
रघुवंशः

५६५



स्विन्पालन्दम्याञ्च वसुधाधिपा ॥२२॥ तस्यामात्मानुरूपायामात्मजन्मसमुत्सुकः । विलंबितफलैः का
लं सनिनाय मनोरथैः ॥२३॥ संतानार्थीय विधेयस्त्वनुजादेवतारिता । तेन धूर्जगतो गुर्वी सचि
वेषु निचिक्षिपे ॥२४॥ स्नेपकः । गंगाभागीरथीनेव ष्टुं वैधापावनत्तमा । दूष्टतासंतीतितेनन्य
स्तामंत्रिपुंकोशलाः ॥२५॥ अथाभ्यर्चविधातारं दंपती पुत्रकाम्यया । तौ दंपती वशिष्ठस्य गु
रोर्जग्मतुराश्रमं ॥२६॥ स्निग्धगंभीरनिर्घोषमेकस्यंदनमास्थितौ । प्रावृषेण्यं प
योवाहं विद्युदैरावताविव ॥२७॥ माभूदाश्रमपीडेति परिमेयपुरस्सरौ । अनुभाव
विशेषात्तु सेनापरिवृताविव ॥२८॥ सेव्यमानौ सुखस्पर्शैः शालनिर्यासगंधिभिः । पुष्प

रघु० रेणूत्करैर्वातैराधूतवनराजिभिः॥३९॥पवनस्यानुकूलत्वात्सार्थनासिद्धिशंसिनः॥रजोभिस्तु
१ रगोत्कीर्णैरस्पृष्टालकवेष्टनौ॥४०॥हैयंगवीनमादाय घोषवृद्धानुपस्थितान्॥नामधेया
निपृच्छन्तौ वन्यानां मार्गशाखिनां॥४१॥सरसीष्वरविंदानां वीचिविक्षोभशीतलं॥आमो
दमुपजिघ्रन्तौ स्वनिःश्वासानुकारिणं॥४२॥मनोभिरामाः शृण्वन्तौ रथनेमिस्वनोन्मुखैः॥
खड्जसंवादिनीः केका द्विधा भिन्नाः शिखण्डिभिः॥४३॥परस्पराक्षिसादृश्यमदूरोज्झि
तवर्त्मसु॥मृगद्वन्द्वेषु पश्यन्तौ स्यन्दनाबद्धदृष्टिषु॥४४॥श्रेणीबन्धाद्वितन्वद्भिरस्त
म्भां तोरणस्रजं॥सारसैः कलनिर्ह्रादैः क्वचिदुन्नमिताननौ॥४५॥ग्रामेष्वात्मनिसृ ॥२॥

तुमर्हंति सदसद्व्यक्तिहेतवः। हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा।१०। वैवस्वतो मनुर्नाम माननीयो
मनीषिणां। आसीन्महीक्षितामाद्यः प्रणवश्छंदसामिव।११। तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः। दिलीप इ
ति राजेंदुरिंदुः क्षीरनिधाविव।१२। व्यूढोरस्को वृषस्कंधः शालप्रांशुर्महाभुजः। आत्मकर्मक्षमं देहं क्षात्रो ध
र्म इवाश्रितः।१३। सर्वातिरिक्तसारेण सर्वतेजोभिभाविना। स्थितः सर्वोन्नतेनोर्वीं क्रांत्वा मेरुरिवात्म
ना।१४। आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः। आगमैः सदृशारंभः आरंभसदृशोदयः।१५। भीमकांतैर्नृ
६ पगुणैः स बभूवोपजीविनां। अधृष्यश्चाभिगम्यश्च यादोरत्नैरिवार्णवः।१६। रेखामात्रमपि क्षुण्णादा मनो
वर्त्मनः परं न व्यतीयुः प्रजास्तस्य नियंतुर्नेमिवृत्तयः।१७। प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रही
त्सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः।१८। सेना परिच्छदस्तस्य द्वयमेवार्थसाधनं। शास्त्रेष्वकुंठिता
बुद्धिपुद्धिमौर्वी धनुषि चातता।१९। तस्य संवृतमंत्रस्य गूढाकारेंगितस्य च। फलानुमेयाः प्रारंभाः
संस्काराः प्राक्तना इव।२०। जुगोपात्मानमत्रस्तो भेजे धर्ममनातुरः। अगृध्नुराददे सोऽर्थमसक्तः सुखम

मन्वन्तरः २१ ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः । गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव २२

अनाकृष्टस्य विषयैर्विद्यानां पारदृश्वनः । तस्य धर्मरतेरासीद्वृद्धत्वं जरसा विना २३ प्रजानां विनयाधाना

।२।। द्रक्षणाद्भरणादपि । स पिता पितरस्तासां केवलं जन्महेतवः २४ स्थित्यै दण्डयतो दण्ड्यान्परिणेतुः प्रसूतये ।

अप्यर्थकामौ तस्यास्तां धर्म एव मनीषिणः २५ दुदोह गां स यज्ञाय सस्याय मघवा दिवं । संपद्वि

२ नियमेनोभौ दधतुर्भुवनद्वयं २६ न किलानुययुस्तस्य राजानो रक्षितुर्यशः । व्यावृत्ता यत्परस्वेभ्यः

श्रुतौ तस्करता स्थिता २७ द्वेष्योऽपि संमतः शिष्टस्तस्यार्तस्य यथौषधं । त्याज्यो दुष्टः प्रियोऽप्यासीद

ङ्गुष्ठ इवाहिक्षता २८ तं वेधा विदधे नूनं महाभूतसमाधिना । तथा हि सर्वे तस्यासन्

परार्थैकफला गुणाः २९ स वेलावप्रवलयां परिखीकृतसागरां । अनन्यशा

सनामुर्वीं शशासैकपुरीमिव ३० तस्य दाक्षिण्यरूढेन नाम्ना मगधवंशजा ।

पत्नी सुदक्षिणेत्यासीदध्वरस्येव दक्षिणा ३१ कलत्रवन्तमात्मानमवरोधे महत्यपि तया मेने मनस्विन्या ।।२।।

ष्वेषु यूपचिह्नेषु यज्वनां। अमोघाः प्रतिगृह्णन्तावर्घ्यानुपदमाशिषः ॥४५॥ [illegible] काप्यभिख्या

तयोरासीद्व्रजतोः शुद्धवेषयोः। हिमनिर्मुक्तयोर्योगे चित्राचंद्रमसोरिव ॥४७॥ तत्तद्भूमिप

तिः पत्न्यै दर्शयन्प्रियदर्शनः। अपि लंघितमध्वानं बुबुधे न बुधोपमः ॥४८॥ स दुःष्प्रापयशाः प्रा

पदाश्रमं श्रांतवाहनः। सायं संयमनस्तस्य महर्षेर्महिषीसखः ॥४९॥ वनांतरादुपावृत्तैः स

मित्कुशफलाहरैः। पूर्यमाणमदृश्याग्निप्रत्युद्यातैस्तपस्विभिः ॥५०॥ आकीर्णमृषिपत्नीनामु

टजद्वाररोधिभिः। अपत्यैरिव नीवारभागधेयोचितैर्मृगैः ॥५१॥ सेकांते मुनिकन्याभिस्तत्क्ष

णोज्झितवृक्षकं। विश्वासाय विहंगानामालवालांबुपायिनां ॥५२॥ आतपात्ययसंक्षिप्तनी

रघु०१

वारासु निषादिभिः। मृगैर्वर्त्तितरोमंथमुटजांगणभूमिषु।५३। अभ्युद्धताग्निपशुनैरतिथीना
श्रमोन्मुखान्। पुनानं पवनोद्धूतैर्धूमैराहुतिगंधिभिः।५४। कुलकं। अथ यंतारमादिश्य धुर्यान्
विश्रामयेति सः। तामवारोपयत्पत्नीं रथादवततार च।५५। तस्मै सभ्याः सभार्याय गोप्त्रे गुप्ततमेंद्रि
याः। अर्हणामर्हते चक्रुर्मुनयो नयचक्षुषे।५६। विधेः सायंतनस्यांते स ददर्श तपोनिधिं। अन्वासित
मरुंधत्या स्वाहयेव हविर्भुजं।५७। तयोर्जगृहतुः पादान् राजा राज्ञी च मागधी। तौ गुरुर्गुरुपत्नी
च प्रीत्या प्रतिननंदतुः।५८। तमातिथ्यक्रियाशांतरथक्षोभपरिश्रमं। पप्रच्छ कुशलं राज्ये रा
ज्याश्रममुनिं मुनिः।५९। अथाथर्वनिधेस्तस्य विजितारिपुरः पुरः। अर्थ्यामर्थपतिर्वाचमाददे व